# Shri TripurasundaryA Dvadashashloki StutiH

# श्रीत्रिपुरसुन्दर्याद्वादशश्लोकीस्तुतिः

## Document Information

Text title : tripurasundaryAdvAdashashlokIstutiH

File name : tripurasundaryAdvAdashashlokIstutiH.itx

Category : devii, dvAdasha, dashamahAvidyA, devI

Location : doc_devii

Description/comments : See also lalitAsahasranAmastotram from nAradapurANa, and nityAShoDashikArNavaM

Latest update : April 20, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 23, 2023

*sanskritdocuments.org*

# श्रीत्रिपुरसुन्दर्याद्वादशश्लोकीस्तुतिः

गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीम् ।
देवीं मन्त्रमयीं नौमि मातृकापीठरूपिणीम् ॥ १॥

प्रणमामि महादेवीं मातृकां परमेश्वरीम् ।
कालहृल्लोहलोल्लोहकलानाशनकारिणीम् ॥ २॥

यदक्षरैकमात्रेऽपि संसिद्धे स्पर्द्धते नरः ।
रविताक्ष्र्येन्दुकन्दर्पैः शङ्करानलविष्णुभिः ॥ ३॥

यदक्षरशशिज्योत्स्नामण्डितं भुवनत्रयम् ।
वन्दे सर्वेश्वरीं देवीं महाश्रीसिद्धमातृकाम् ॥ ४॥

यदक्षरमहासूत्रप्रोतमेतज्जगत्त्रयम् ।
ब्रह्माण्डादिकटाहान्तं तां वन्दे सिद्धमातृकाम् ॥ ५॥

यदेकादशमाधारं बीजं कोणत्रयोद्भवम् ।
ब्रह्माण्डादिकटाहान्तं जगदद्यापि दृश्यते ॥ ६॥

अकचादिटतोन्नद्धपयशाक्षरवर्गिणीम् ।
ज्येष्ठाङ्गबाहुहृत्कण्ठकटिपादनिवासिनीम् ॥ ७॥

नौमीकाराक्षरोद्धारां सारात्सारां परात्पराम् ।
प्रणमामि महादेवीं परमानन्दरूपिणीम् ॥ ८॥

अथापि यस्या जानन्ति न मनागपि देवताः ।
केयं कस्मात्क केनेति सरूपारूपभावनाम् ॥ ९॥

वन्दे तामहमक्षय्यां क्षकाराक्षररूपिणीम् ।
देवीं कुलकलोल्लोलप्रोल्लसन्तीं शिवां पराम् ॥ १०॥

वर्गानुक्रमयोगेन यस्याख्योमाष्टकं स्थितम् ।
वन्दे तामष्टवर्गोत्थमहासिद्ध्यादिकेश्वरीम् ॥ ११॥

कामपूर्णजकाराख्यसुपीठान्तर्न्निवासिनीम् ।
चतुराज्ञाकोशभूतां नौमि श्रीत्रिपुरामहम् ॥ १२॥

इति द्वादशभी श्लोकैः स्तवनं सर्वसिद्धिकृत् ।
देव्यास्त्वखण्डरूपायाः स्तवनं तव तद्यतः ॥ १३॥

इति त्रिपुरसुन्दर्याद्वादशश्लोकीस्तुतिः समाप्ता ।

*Shri TripurasundaryA Dvadashashloki StutiH*

pdf was typeset on July 23, 2023

Please send corrections to *sanskrit@cheerful.com*